## पाठः - ७

# काव्यमुक्तावलिः ।

कुमारसंभवम् , रघुवंशम् ,किरातार्जुनीयम् , शिशुपालवधम् , नैषधीयचरितम् , इत्येतानि भवन्ति पञ्चमहाकाव्यानि । एषु सौन्दर्यस्य तथा शक्तेः च प्रतिरूपेणैव महाकविभिर्महिलाः वर्णिताः । तासामेकैकमुदाहरणमत्र पश्यन्तु ।


# कुमारसम्भवम्

महाकविः कालिदासः कविकुलगुरुरिति विख्यातः भवति। अनेन त्रीणि नाटकानि द्वे महाकाव्ये द्वे खण्डकाव्ये च विरचितानि।अस्य महाकाव्ययोः अन्यतरं भवति कुमारसंभवम्। काव्येऽस्मिन् पार्वतीपरमेश्वरयोः विवाह पर्यन्ता कथा एव कालिदासेनोपवर्णिता इति श्रूयते।

कुमारसंभवे षष्ठसर्गे गौरीं परिणेतुमिच्छोः शम्भोः दौत्येन सप्तर्षयः हिमवन्तं प्रापुः। तेषु अङ्गिरः गिरिशस्य कृते गिरिजां गिरीशं ययाचे। तस्मिन् समये पितुरन्तिके स्थितायाः पार्वत्याः अवस्था कविना एवं वर्णिता।



एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि
गणयामास पार्वती ।।



# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | अधोमुखी ( तिष्ठति) । |
| कानि गणयामास ? | पितुः । |
| का लीलाकमलपत्राणि गणयामास ? | पार्वती । |
| पार्वती कथं तिष्ठति ? | लीलाकसलपत्राणि । |
| अधोमुखी पार्वती कुत्र तिष्ठति ? | गणयामास । |
| पार्वती कस्य पार्श्वे तिष्ठति ? | देवर्षौ एवं वादिनि । |
| पार्वती कदा अधोमुखी अभूत् ? | पार्श्वे |

# क्रमीकृतः अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | गणयामास । |
| कानि गणयामास ? | लीलाकमलपत्राणि । |
| का लीलाकमलपत्राणि गणयामास ? | पार्वती । |
| पार्वती कथं तिष्ठति ? | अधोमुखी ( तिष्ठति) । |
| अधोमुखी पार्वती कुत्र तिष्ठति ? | पार्श्वे । |
| पार्वती कस्य पार्श्वे तिष्ठति ? | पितुः । |
| पार्वती कदा अधोमुखी अभूत् ? | देवर्षौ एवं वादिनि । |

| | |
|---|---|
| पितुरधोमुखी: ( र = र् + अ) | पितु: + अधोमुखी |
| मातुरन्तिकम् ( र = र् + अ) | मातु: + अन्तिकम् |
| भ्रातुरधीनः ( र = र् + अ) | भ्रातु: + अधीनः |
| तुष्टिरुत्तमा ( रु = र् + उ) | तुष्टि: + उत्तमा |
| तयोरेकः ( रे = र् + ए) | तयो: + एकः |
| हेतुरभूत् ( र = र् + अ) | हेतु: + अभूत् |
| कनकामलकैरपूरयत् ( र = र् + अ) | कनकामलकै: + अपूरयत् |

| | |
|---|---|
| अधोमुखी | अधः मुखं यस्याः सा । |
| नम्रमुखी | नम्रं मुखं यस्याः सा । |
| विचित्रमुखी | विचित्रं मुखं यस्याः सा । |
| देवर्षिः | देवः च असौ ऋषिःच । |
| परमर्षिः | परमः च असौ ऋषिः च । |
| राजर्षिः | राजा च असौ ऋषिः च । |
| महर्षिः | महान् च असौ ऋषिः च । |

| | |
|---|---|
| पार्वती | पर्वतस्य अपत्यं स्त्री । |
| पाञ्चाली | पाञ्चालस्य अपत्यं स्त्री । |
| हिडुम्बी | हिडुम्बस्य अपत्यं स्त्री । |
| द्रौपदी | द्रुपदस्य अपत्यं स्त्री । |
| जानकी | जनकस्य अपत्यं स्त्री । |
| भागीरथी | भगीरथस्य अपत्यं स्त्री । |

# रघुवंशम्

सूर्यवंशप्रसूतेः दिलीपादारभ्य अग्निवर्णपर्यन्तानां रघूणामन्वयः एव रघुवंशस्य प्रमेयः । अस्य चतुर्दशे सर्गे सीतापरित्याग एव कथावस्तु। रावण-निग्रहानन्तरं अयोध्यां प्रत्यागतः सीतासमेतः राज्ये अभिषिक्तः रामः अन्तर्वत्नीं तां लोकापवादभिया परित्यक्तुं निश्चिकाय। तन्निर्वहणार्थं लक्ष्मणमादिदेश च। तथा तां वाल्मीकेरुटजोपान्तमुपनीय भ्रातुराज्ञां निरुह्य यातुकामं सौमित्रिं सीता एवं वदति।



वाच्यस्त्वया मद्वचनात् स  राजा

वह्नौ विशुद्धामपि यत्समक्षम् ।

मां लोकवादश्रवणादहासीः

श्रुतस्य किं तत्सदृशं कुलस्य ? ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

| | |
|---|---|
| त्वया( लक्ष्मणेन) किं वाच्य:? | अहासी: |
| अस्मिन् वाक्ये क्रियापदं किम् ? | श्रुतस्य कुलस्य सदृशं किम् ? ( इति) |
| काम् आहासी: ? | वह्नौ विशुद्धावपि ( मां) । |
| कस्मात् अहासी: ? | त्वया ( लक्ष्मणेन) वाच्य: । |
| कीदृशीं माम् ? | माम् । |
| कस्य समक्षम् ? | मत् ( सीताया:) वचनात् । |
| केन वाच्य: ? | ( यत् ) लोकवादश्रवणात् । |
| कस्या: वचनात् ? | राज्ञ: समक्षम् । ( यत्) |

# श्लोकस्य अन्वयः ।

| | |
|---|---|
| त्वया( लक्षमणेन) किं वाच्यः? | श्रुतस्य कुलस्य सदृशं किम् ? ( इति) |
| अस्मिन् वाक्ये क्रियापदं किम् ? | अहासीः |
| काम् आहासीः ? | माम् । |
| कस्मात् अहासीः ? | ( यत् ) लोकवादश्रवणात् । |
| कीदृशीं माम् ? | वह्नौ विशुद्धावपि ( मां) । |
| कस्य समक्षम् ? | राज्ञः समक्षम् । ( यत्) |
| केन वाच्यः ? | त्वया ( लक्ष्मणेन) वाच्यः । |
| कस्याः वचनात् ? | मत् ( सीतायाः) वचनात् । |

| | |
|---|---|
| वाच्यस्त्वया ( स् = : ) | वाच्य: +त्वया |
| ततस्ततः ( स् = : ) | तत: + ततः |
| सरस्तीरम् ( स् = : ) | सर: + तीरम् |
| हरिस्तव ( स् = : ) | हरि: + तव |
| स राजा | स: + राजा |
| स विधाय | स: + विधाय |
| स मुनिः | स: + मुनिः |

| | |
|---|---|
| विशुद्धामपि ( म = म् + अ) | विशुद्धाम्+ अपि |
| गन्तुमशक्तः ( म = म् + अ) | गन्तुम् + अशक्तः |
| तामपृच्छत् ( म = म् + अ) | ताम् + अपृच्छत् |
| इमामहम् ( म = म् + अ) | इमाम्  + अहम् |
| लोकवादश्रवणादहासीः( द = त्+अ) | लोकवादश्रवणात् + अहासीः |
| आसीदयम् ( द = त् + अ) | आसीत् + अयम् |
| ग्रन्थादुद्धृतः ( दु = त् + उ ) | ग्रन्थात् + उद्धृतः |

# किरातार्जुनीयम्

पञ्चमहाकाव्येषु अर्थगौरवेण सविशेषं स्थानमावहति भारवेः किरातार्जुनीयम्। “ उपमा कालिदासस्य भारवेरर्थगौरवम्” इति या प्रथा सा किरातार्जुनीयस्य गौरवं नितरां व्यनक्ति। काव्येऽस्मिन् अष्टादशसर्गाः विद्यन्ते। तत्र प्रथम सर्गे द्यूतक्रीडायां कौरवैरभिभूताः पाणडवाः समयपालनाय वनं प्रविष्टाः। गच्छता कालेनापि राज्यलाभाय युधिष्ठिरः किमपि न करोतीत्यतः पाञ्चाली तमेवं वदति।



इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

अस्मिन् वाक्ये क्रियापदं किम् ?

कथं रुजन्ति ?

के रुजन्ति ?

आधयः किं रुजन्ति ?

कस्याः ?

कीदृश्याः ?

किं विचिन्तयन्त्याः ?

कीदृशम् भवदापदम् ?

किं न वेद ?

चित्तवृत्तयः कीदृशाः खलु ?

अपरं क्रियापदं किम् ?

का न वेद ?

पुनः किम न वेद ?

कस्य धियम् ?

कीदृशीं तावकीं धियम् ?

आधयः ।

चेतः ।

रुजन्ति ।

प्रसभं ।

भवदापदम् ।

पराम् ।

मम ( द्रौपद्याः) ।

विचिन्तयन्त्याः ।

विचित्ररूपाः खलु ।

चित्तवृत्तयः ।

अहम् ।

न वेद ।

तावकीम् ।

इमाम् ।

धियम् ।

# श्लोकस्य अन्वयः ।


| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | रुजन्ति । |
| कथं रुजन्ति ? | प्रसभं । |
| के रुजन्ति ? | आधयः । |
| आधयः किं रुजन्ति ? | चेतः । |
| कस्याः ? | मम ( द्रौपद्याः) । |
| कीदृश्याः ? | विचिन्तयन्त्याः । |
| किं विचिन्तयन्त्याः ? | भवदापदम् । |
| कीदृशम् भवदापदम् ? | पराम् । |
| किं न वेद ? | चित्तवृत्तयः । |
| चित्तवृत्तयः कीदृशाः खलु ? | विचित्ररूपाः खलु । |
| अपरं क्रियापदं किम् ? | न वेद । |
| का न वेद ? | अहम् । |
| पुनः किम न वेद ? | धियम् । |
| कस्य धियम् ? | तावकीम् । |
| कीदृशीं तावकीं धियम् ? | इमाम् । |

| | |
|---|---|
| ममाधयः ( मा = म + आ) | मम + आधयः |
| ममापि ( मा = म + अ ) | मम + अपि |
| तवापि ( वा = व + अ ) | तव + अपि |
| विचित्ररूपा खलु | विचित्ररूपा: + खलु |
| जनताया हृदयम् | जनतायाः + हृदयम् |
| विचिन्तयन्त्या भवदापदम् | विचिन्तयन्त्याः + भवदापदम् |
| लता अत्र | लताः + अत्र |

| | |
|---|---|
| चित्तवृत्तिः | चित्तस्य वृत्तयः |
| चित्तशुद्धिः | चित्तस्य शुद्धिः |
| शरीरशुद्धिः | शरीरस्य शुद्धिः |
| हिमालयः | हिमस्य आलयः |
| वृक्षशाखा | वृक्षस्य शाखा । |
| तावकीम् | तव इदं तावकम् । तत् संबन्धिनीम् । |
| मामकीम् | मम इदं मामकम् । तत् संबन्धिनीम् । |

# शिशुपालवधम्

अलङ्कारैरर्थगौरवेण पदलालित्येन च व्यतिरिच्य विलसति माघस्य शिशुपालवधम् । माघविरचित्वादस्य माघमिति नामान्तरमप्यस्ति ।चेदिराजस्य शिशुपालस्य द्वारकाधीशस्य श्रीकृष्णस्य च मिथः संवृत्तःसङ्ग्रामः अन्ते शिशुपालस्य वधश्चास्य प्रमेयः । काव्येऽस्मिन् विंशतिस्सर्गास्सन्ति । अस्य पञ्चदशे सर्गे श्रीकृष्णमभियोद्धुं प्रस्थितेभ्यः शिशुपालभटेभ्यस्तेषां नारीभिः कृता यात्रानुमतिः वर्णिता । प्रसङ्केऽस्मिन्नारीणां निर्भयतां मनःस्थैर्यं च नितरां प्रकाशयति ।



न मुमोच लोचनजलानि
दयिताजयमङ्गलैषिणी ।
यातमवनिमवसन्नभुजा-
न्न गलद्विवेद वलयं विलासिनी ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | अवनिम्। |
| कं न विवेद ? | वलयम्। |
| कुत्र प्राप्तम् ? | न विवेद। |
| किं भूतलं प्राप्तम् ? | यातम्। |
| कस्मात् वलयं भूतलं प्राप्तम् ? | विलासिनी। |
| अन्यत् क्रियापदं किम् ? | दयितजयमङ्गलैषिणी। |
| कानि न अमुञ्चत् ? | न अमुञ्चत्। |
| का लोचनजलानि न अमुञ्चत् ? | अवसन्नभुजात् गलद्। |
| कीदृशी विलासिनी ? | लोचनजलानि। |

# श्लोकस्य अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | न विवेद । |
| कं न विवेद ? | यातम् । |
| कुत्र प्राप्तम् ? | अवनिम् । |
| किं भूतलं प्राप्तम् ? | वलयम् । |
| कस्मात् वलयं भूतलं प्राप्तम् ? | अवसन्नभुजात् गलद् । |
| अन्यत् क्रियापदं किम् ? | न अमुञ्चत् । |
| कानि न अमुञ्चत् ? | लोचनजलानि । |
| का लोचनजलानि न अमुञ्चत् ? | विलासिनी । |
| कीदृशी विलासिनी ? | दयितजयमङ्गलैषिणी । |

| | |
|---|---|
| अवसन्नभुजान्न ( न्न = त् + न) | अवसन्नभुजात् + न |
| तस्मान्न ( न्न = त् + न) | तस्मात् + न |
| तन्न ( न्न = त् + न) | तत् + न |
| गलद्विवेद | गलद् + विवेद |
| दारिद्र्याद्दुद्धर्तुं | दारिद्र्याद् + उद्धर्तुम् |
| | |
| | |

# नैषधीयचरितम्

श्रीहर्षेण विरचितं महाकाव्यं भवति नैषधीयचरितम्।अर्थगौरवेण नैषधं विद्वदौषधम् इत्युक्तिरप्यस्ति।निषधाधिपतेर्नलस्य तथा वैदर्भ्याः दमयन्त्याः मिथः अनुरागः पश्चात्तेषां विवाहादयः नैषधीयचरितेऽनुवर्णिताः। एकविंशतिः सर्गास्सन्त्यस्मिन् काव्ये। अस्य नवमसर्गात् उद्धृतोऽयं श्लोकः।दमयन्तीं परिणेतुं प्रस्थितं नलमुपागम्य इन्द्राग्निवायुयमवरुणदेवाः दमयन्तीं प्रति तेषामनुरागं प्रकटयन्ति।तथा तेषां वैवाहिकदूतत्वेन नलमेव दमयन्तीसविधं प्रेषयति च। तत्र प्राप्तः नलः दूतस्य कुल-नामादिके विषये दमयन्तीकृतप्रश्नानाम् उत्तरं न दत्तवान्।अतः सा तम् एवमुक्तवती। यथा -



**मयापि** देयं प्रतिवाचिकं न ते
स्वनाम **मत्कर्णसुधामकुर्वते** ।
परेण पुंसां हि **ममापि** सङ्कथा
कुलाबलाचारसहासनासहा ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | आचारत्वात् |
| किं नासह ? | सङ्कथा |
| कुतः ? | नासह |
| केषां आचारः ? | पुंसा |
| पुनः किम् ? | प्रसभं |
| केन ( सह) ? | कुलाबलानाम् |
| कीदृशेन ? | न देयम् |
| कस्याः अपि ? | प्रतिवाचिकम् |
| पुनः क्रियापदं ? | परेण |
| किं न देयम् ? | ममापि |
| कया अपि ? | ते |
| कस्मै ? | मया अपि |
| किं न क्रियते ? | स्वनाम |
| किम् अकुर्वते ? | मत् कर्णसुधाम् |
| कस्य नाम ? | अकुर्वते |

# श्लोकस्य अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | नासह |
| किं नासह ? | प्रसभं |
| कुतः ? | आचारत्वात् |
| केषां आचारः ? | कुलाबलानाम् |
| पुनः किम् ? | सङ्कथा |
| केन ( सह) ? | पुंसा |
| कीदृशेन ? | परेण |
| कस्याः अपि ? | ममापि |
| पुनः क्रियापदं ? | न देयम् |
| किं न देयम् ? | प्रतिवाचिकम् |
| कया अपि ? | मया अपि |
| कस्मै ? | ते |
| किं न क्रियते ? | अकुर्वते |
| किम् अकुर्वते ? | मत् कर्णसुधाम् |
| कस्य नाम ? | स्वनाम |

| | |
|---|---|
| ममाध्यः ( मा = म + आ) | मम + आध्यः |
| ममापि ( मा = म + अ ) | मम + अपि |
| तवापि ( वा = व + अ ) | तव + अपि |
| मयापि | मया + अपि |
| एवात्मनः | एव + आत्मनः |
| मोचयानेन | मोचय + अनेन |
| कस्यापि | कस्य + अपि |

| | |
|---|---|
| कर्णसुधाम् | कर्णयोः सुधा कर्णसुधा , ताम् |
| श्रोत्रसुधाम् | श्रोत्रयोः सुधा श्रोत्रसुधा ,ताम् । |
| नेत्रसुधाम् | नेत्रयोः सुधा नेत्रसुधा , ताम् । |
| नयनसुधाम् | नयनयोः सुधा नयनसुधा ,ताम् । |
| लोचनसुधा | लोचनयोः सुधा लोचनसुधा , ताम् । |
| | |
| | देशे स्थितः । |